**दिनाङ्क :-23.03.2024**
**प्रात: - 06:55**

-

**डूक ग्याल्पो सम्मान:**

भूटानदेशीयेन राज्ञा जिग्मे-खेसर-नामग्येल-वांगचुक् इत्यनेन ह्य: थिम्पू-नगरे प्रधानमन्त्रिणे नरेन्द्रमोदिने भूटानस्य सर्वोच्च-नागरिक-पुरस्कार: **''ऑर्डर ऑफ द डूक-ग्याल्पो''** इति सम्मान: प्रदत्त:। अत्रावसरे श्रीमोदी अभिव्यक्तवान् यत् इदं तस्य जीवनस्य सुदीर्घदिनमस्ति। तेनोक्तं यत् प्रत्येकं पुरस्कार: विशिष्टो वर्तते परञ्च यदा कस्मै अपि परदेशात् पुरस्कार: प्रदीयते तदा अभिज्ञायते यत् उभौ देशौ समुचितमार्गे प्रवर्धेते। असौ अग्रे प्रोक्तवान् यत् सम्मानमिदं तस्य निजोपलब्धि: नैव वर्तते अपि तु भारतदेशस्य अथ च तस्य चत्वारिंशद्-अधिकैकशत-कोटि-भारतीय-नागरिकाणां सम्मानमस्ति। पुरस्कार-स्वीकरणानन्तरंम् अनेन स्वीयाभारो अभिव्यक्त:। तदनु प्रधानमन्त्री ह्य: मध्याह्ने थिम्पूनगरे ताशी-छोड-जोंग-भवने भूटानस्य राज्ञा सह वार्तामपि साधितवान्। एतौ उभौ नेतारौ भारत-भूटान-देशयो: पारस्परिक-मित्रतां पुनरावर्तितवन्तौ। द्वैपाक्षिक-सम्बन्धानाञ्च समीक्षां विहितवन्तौ। ध्येयं वर्तते यत् प्रधानमन्त्री ह्य: प्रात: द्विदिवसीय-भूटान-यात्रायां थिंपूनगरस्य पारो-विमान -पत्तनस्थानकं सम्प्राप्तवान् आसीत्। यत्र भूटानदेशीयेन प्रधानमन्त्रिणा एतस्य पारम्परिकपद्धत्या सह स्वागतं विहितम्। अत्रावसरे प्रधानमन्त्री भूटानस्य राज्ञा जिग्मे-खेसर-नामग्याल-वांग्चुक-इत्यनेन सह भूटानस्यैव च चतुर्थराज्ञा जिग्मे-सिंग्ये इत्यनेन सहापि मेलनं कृतवान्।

**इसरो**

इसरो इति भारतीयान्तरिक्षानुसन्धानसङ्घटनेन ह्य: कर्नाटकस्य चित्रदुर्ग-परीक्षण-स्थले स्वीयं पुष्पक-इत्याख्यं 'रीयूज़ेबल लॉन्च व्हीकल' पुनः प्रयुज्यमानं प्रक्षेप्ययन्त्रं सफलतापूर्वकं प्रत्यावर्तितम्। भारतीयान्तरिक्षानुसन्धानसङ्घटनस्य अध्यक्षेन एस-सोमनाथेन सामाजिक-सञ्चारपटले एकस्मिन् सन्देशे उल्लिखितं यत् अन्तरिक्षयानस्य पूर्णतया स्वनियन्त्रित-सञ्चालनाय इसरो-दलाय वर्धापनानि। इसरो इत्यनेन अन्तरिक्षयानस्य परीक्षणेन पुनरेकदा स्वदैशिकप्रौद्योगिकि-संस्थापिता। अत्रावसरे सूचनाप्रसारणमन्त्री अनुरागसिंहठाकुरः अवोचत् यत् अनेन परीक्षणेन सह भारतेन अन्तरिक्षक्षेत्रे नूतनकीर्तिमान-स्थापनस्य प्रतिबद्धता प्रकटिता।

**यूएन-ए□ई-संकल्पम्**

संयुक्तराष्ट्रसङ्घ महासभाया कृत्रिमबुद्धिमत्ता आधारितं प्रथमं ए आई संकल्पस्य अनुमोदनं कृतम्। संकल्पमिदम् अन्ताराष्ट्रिय-प्रयासान् वैश्विकसमर्थनं प्रददाति येन नूतन प्रौद्योगिकी सर्वेषां राष्ट्राणां लाभं, मानवाधिकारस्य सम्मानं , सुरक्षितं, संरक्षितं च भवेत् इति सुनिश्चितं करोति।

**ऋतु-विभाग:**

भारत-ऋतु-विज्ञान-विभागेन (आईएमडी) इत्यनेन पूर्वोत्तरभारते अस्य मासस्य षड्विंशति दिनाङ्कं यावत् आतिवृष्टेः, विद्युद-द्योतनस्य च संभावना प्रकटिता। आगामिषु चतुर्दिनेषु अरुणाचलप्रदेशे, असम राज्ये, मेघालये, नागालैण्ड् राज्ये, मणिपुरे, मिजोरम राज्ये, त्रिपुरायां, सिक्किमे, उपहिमालयीय पश्चिमबङ्गै च अतिवृष्टिः भविष्यति। ऋतु विभागेन पञ्जाबे,हिमाचल-प्रदेशे, उत्तराखण्डे, जम्मू-कश्मीरे, लद्दाखे च अद्य अल्प वृष्टिः हिमपात: च भविष्यति इति ख्यापिता।

**□ईपीएल**

क्रिकेट-स्पर्धामालिकायाः अस्य वर्षस्य आईपीएल इति संस्करणस्य आरम्भः ह्य: अभवत्। प्रथम-स्पर्धायाम् ह्य: चेन्नई-नगरस्य एमए चिदम्बरम इति क्रीडांगणे चेन्नई-सुपर्-किंग्स्-दलेन रॉयल-चालेन्जर्स्-बैंग्लुरुदलं षड् स्तोभै: पराजितम्।

**।। इति वार्ता: ।।**